# शास्त्रि – प्रथमसत्रार्द्धम्

## DSCC-1

**प्रस्तावना –**

- श्रौतकर्मणि अग्निहोत्रम्, इष्टिः, सोमश्चेति त्रीणि कर्माणि प्रकृतिपदवाच्यानि भवन्ति। तत्र प्रधानं कर्म दर्शपूर्णमासेष्टिः। तस्यां शाखाच्छेदनादिकर्मणि विनियुक्तानां मन्त्राणां भाष्यमधीत्य छात्राः कर्मस्वरूपं ज्ञातुं प्रभविष्यन्ति । अतः प्रकृतस्य दर्शपूर्णमासयागस्य स्वरूपं परमावश्यकम् । अस्मिन् पत्रे दर्शपूर्णमासेष्टिसम्बद्धानां मन्त्राणां भाष्यमध्येष्यन्ति ।

**उद्देश्यम् –**

- वेदस्य लक्षणं सायणदिशा ज्ञास्यन्ति ।
- श्रौतकर्मणि इष्टेः स्वरूपज्ञानं भविष्यति।
- शाखाच्छेदनादिमन्त्राणाम् अर्थं ज्ञास्यन्ति ।
- इष्टौ अध्यवर्युकर्तृकं कर्म ज्ञास्यन्ति ।
- मन्त्राणां विनियोगज्ञानं प्राप्स्यन्ति ।

**सङ्गतिः –**

- कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायाः प्रथमप्रश्नान्तर्गतानां विषयाणां तारतम्येनाध्यापनम् ।

**फलितांशः –**

- दर्शपूर्णमासयागान्तर्गतात् शाखाच्छेदनप्रकरणादारभ्य कपालेष्वङ्गाराध्यूहनपर्यन्तम् भागम् अधिगमिष्यन्ति ।
- सम्पूर्णस्य दर्शपूर्णमासप्रकरणस्य अवगमनप्रक्रियाम् अनुष्ठानप्रक्रियां च ज्ञातुं प्रभविष्यति ।
- मन्त्राणां श्रौतकर्मणि विनियोज्ञाम् एतत्पत्राध्ययनेन विद्यार्थिनां श्रौतकर्मस्वरूपं द्रढं भविष्यति ।

| पत्र कोड एवं विषय | पाठ्यवस्तु विवरण | क्रेडिट |
|---|---|---|
| DSCC 1 | दर्शपूर्णमासमन्त्राः<br>सायणभाष्यसहित-तैत्तिरीयसंहितायां प्रथमकाण्डे प्रथमप्रश्ने आदितः सप्तमानुवाकसमाप्तिपर्यन्तम् सब्राह्मणम्<br>Unit – 1 (1 क्रेडिट्)<br>• उपोद्धातात् वत्सापाकरणादिपर्यन्तम् (1 अनुवाकः)<br>Unit – 2 (1 क्रेडिट्)<br>• अश्वपर्वाभिमन्त्रणात् विष्णो हव्यं रक्षस्वेतिमन्त्रपर्यन्तम् (2-3 अनुवाकौ)<br>Unit – 3 (1 क्रेडिट्)<br>• हस्तप्रक्षालनात् पात्र्यां हविःप्रक्षेपपर्यन्तम् (4-5 अनुवाकौ)<br>Unit – 4 (1 क्रेडिट्)<br>• अवधूननात् कपालेष्वङ्गाराध्यूहनपर्यन्तम् (6-7 अनुवाकौ) | कुल 4 |
| **सन्दर्भग्रन्थः** | **तैत्तिरीयसंहिता सायणभाष्यसमेता, आनन्दाश्रमग्रन्थालयः** | |

दिनाङ्कः - 17-08-2024

हस्ताक्षरम्

वेदाङ्ग-वेदभाष्यविद्याशाखाध्यक्षः - प्रो.सूर्यनारायणभट्टः

## DSCC 2

**प्रस्तावना –**

- वेदच्छात्रेभ्यः मीमांसाज्ञानमावश्यकम् । अतः मीमांसाप्रकरणग्रन्थः श्रीकृष्णयज्वविरचिता मीमांसापरिभाषा अत्र पाठ्यो विषय: । अस्य ग्रन्थस्याध्ययनेन वेदलक्षणं, धर्मलक्षणं, विधिस्वरूपमित्यादि विविधानंशान् अवगन्तुं शक्ष्यन्ति ।

**उद्देश्यम् –**

- श्रौतयागप्रक्रियामाधृत्य कृतस्य भाष्यस्य सम्यगवगमनाय वेदच्छात्रेभ्यः मीमांसाज्ञानपपि अपेक्ष्यते। अस्य ग्रन्थस्याध्ययनेन नूनं छात्रा: लाभान्विता भविष्यन्ति ।
- मीमांसाशास्त्रे प्रवेशदृष्ट्या श्रीकृष्णयज्वविरचिता मीमांसापरिभाषा अत्र गृह्यते ।

**सङ्गतिः –**

- वेदभाष्यस्य सम्यगवमनार्थं मीमांसाशास्त्रज्ञानं नितान्तम् अपेक्ष्यते । अतः अत्र मीमांसाशास्त्रज्ञानार्थं मीमांसापरिभाषा उपकरोति ।

**फलितांशः –**

- मीमांसादृष्ट्या क्रमस्वरूपादारभ्य अर्थवादविचारपर्यन्तं भागम् अवबोद्धुं शक्ष्यन्ति ।
- वेदेषु उपदिष्टानां विविधविधिप्रकाराणाम् अर्थं ज्ञास्यन्ति ।

| पत्र कोड एवं विषय | पाठ्यवस्तु विवरण | क्रेडिट |
|---|---|---|
| DSCC 2 | मीमांसापरिभाषा<br>Unit – 1 (1 क्रेडिट्)<br>• धर्माधर्मनिरूपणात् ब्राह्मणवाक्यभेदकथनपर्यन्तम्<br>Unit – 2 (1 क्रेडिट्)<br>• प्रयोगविधिनिरूपणम्<br>Unit – 3 (1 क्रेडिट्)<br>• विधित्रैविध्यं परिसंख्याविधिश्च<br>Unit – 4 (1 क्रेडिट्)<br>• श्रुत्यादिषट् प्रमाणात् क्रमनिरूपणसमाप्तिपर्यन्तम् | कुल 4 |
| **सन्दर्भग्रन्थः** | **श्रीकृष्णयज्वविरचिता मीमांसापरिभाषा** | |

दिनाङ्कः - 17/08/2024

हस्ताक्षरम्

सूर्यनारायणः

वेदाङ्ग-वेदभाष्यविद्याशाखाध्यक्षः - प्रो.सूर्यनारायणभट्टः